National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 345-348
© 2026 NJHSR
www.sanskritarticle.com

**Dr. C. Hariharan**
Asst. Prof. M.A Sanskrit
& Director Digital Campus,
The Madras Sanskrit College

**Correspondence:**
**Dr. C. Hariharan**
Asst. Prof. M.A Sanskrit
& Director Digital Campus,
The Madras Sanskrit College

# अष्टमाध्यायनिरूपणम् पार्वणहोमविचारश्च

**Dr. C. Hariharan**

## प्रतिज्ञा

मीमांसाबालप्रकाशाख्यं ग्रन्थं मुख्यरूपेणाधारीकृत्य प्रबन्धोयं विरच्यते। यद्यपि पार्वणहोमविचारः अग्रिमाध्याये निरूपितः तथापि सः अग्रिमाध्याये नवमे प्रासङ्गिकः विचारित इति पूर्वमानीय वशदीक्रियते। प्रकृतिविकृतिभावे विशषलिङ्गानां निरूपणमत्र क्रियत इति प्रबन्धस्य लेखनं प्रेरयति।

## विषयविवेचनम्

सप्तमे अध्याये सामान्यतः अतिदेशनिरूपणोत्तरम् अष्टमे अध्याये अतिदेशविशेषः निरूप्यते। अत्र सादृश्यकल्पितवचनातिदेशे विशिष्य प्रकृतिविकृतिभावः कीदृशं सामान्यधर्मं पुरस्कृत्य भवेत् इति निरूप्यते, तादृश सामान्यधर्माणां च मध्ये कः धर्मः शीघ्रोपस्थित्यादिगमकसहकारेन प्रबलः सन् प्राकृताङ्गप्रापकः भवति इति निरूपणम् अत्र मुख्यतया क्रियते।

"यस्य लिङ्गम् अर्थसंयोगात्" इति सूत्रम् आधारीकृत्य बहुषु अधिकरणेषु प्रकृतिलिङ्गनिरूपणं प्रवृत्तम्। इष्टिषु प्रकृतिविकृतिभावनिर्णये तद्धितेन देवतानिर्देशः, एकदेवताकत्वं , द्विदैवत्यं वा, औषधद्रव्यकत्वं, आज्यद्रव्यकत्वं, द्रव – समानवर्णद्रव्यकत्वं, पशुप्रभवगतिमद्द्रव्यकत्वं, निर्वपतिवत्वं, आलभतिवत्वं इत्यादिधर्माः लिङ्गनि नियामकानि भवन्ति।

पशुयागेषु प्रकृतिविकृतिभावनिर्णये आलभतिवत्वं, प्राणिद्रव्यकत्वं, सुत्याकालत्वं, पशुगणत्वं इत्यादीनि लिङ्गानि नियामकानि भवन्ति।

पूर्वोक्तः सर्वोपि विषयः सूत्रैः एव उक्तः। सूत्राणि च "इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात्। पशौ च लिङ्गदर्शनात्। दैक्षस्य चेतरेषु। ऐकादशिनेषु सौत्यस्य द्वैरशन्यस्य दर्शनात्। तत्प्रवृत्तिर्गणेषु स्यात्प्रतिपशु यूपदर्शनात्। अव्यक्तासु तु सोमस्य" इत्यादीनि।

अन्यानि अपि कानिचन लिङ्गानि सूत्रेषु अनुक्तानि अपि अर्थापत्त्या कल्पनीयानि भवन्ति। तथा हि द्रव्यदेवतासंबन्ध – प्रतिपादक – तद्धितान्तपदाक्षरसाम्यम् अपि क्वचित् प्रकृतिविकृतिभावे गमकं भवति। "आग्नावैष्णवमेकादशकपालं निर्वपेत् सरस्वतीमाज्यस्य यजेत बार्हस्पत्यश्चरुः" इति वाक्यविहिते आग्नावैष्णवयागे धर्मातिदेशः "ताभ्यामेतमग्नीषोमीयम् एकादशकपालं पूर्णमासे प्रायच्छत्[1]" इति वाक्यविकितात् अग्नीषोमीययागात् भवति वा "ऐन्द्राग्नमेकादशकपालं निर्वपेत्" इति वाक्यविहितात् ऐन्द्राग्नयागात् भवति वा इति विचारः। यतः प्राकृत – यागद्वये अपि द्विदैवत्यं निर्वपतिमत्वं च अविशिष्टम्। अत्र निर्वपतिमत्वं अग्नीषोमीययागे यद्यपि नास्ति तथापि तदङ्गविधौ निर्वापविधानात् निर्वापवत्वम् अस्त्येव। एवं विरोधे सति, अग्नीषोमीयधर्माः एव अतिदिश्यन्ते इति सिद्धान्तः कृतः। तत्र

च कारणं द्रेव्यदेवतासादृश्यचिन्तना वेलायाम् अग्निमुखत्वम् इति अधिकसादृश्यम् अग्नीषोमीये एव भवति। अग्निदेवतावत्वमपि अत्र समानम्। तथापि अग्निमुखत्वम् इति अधिकधर्मः अग्नीषोमीये अस्तीति तस्यैव प्रकृतित्वं निर्णीयते।

अनयैव रीत्या आरम्भणीयेष्टौ अपि "[2]आग्नावैष्णवमेकादशकपालं निर्वपेत् दीक्षिष्यमाणः" इत्यत्रापि अग्नीषोमीयविकृतित्वम् अवगन्तव्यम्। तथा "द्यावापृथिव्यमेककपालम्" इत्यत्र पञ्चाक्षर तद्धितान्तपदसाम्यात् अग्नीषोमीयविकृतित्वम्। "आश्विनं द्विकपालं" इति वाक्यविहिते तु यागे द्विदैवत्य त्र्यक्षरसादृश्यमादाय ऐन्द्राग्नविकृतित्वम्। तथा "मारुतं सप्तकपालं मरुद्भ्यस्सान्तपनेभ्यः मध्यन्दिने चरुम्" इत्यत्र सान्तपने रूपविशेषणाधिक्ये अपि प्रधानभूतदेवताविधिः त्र्यक्षरः इति कृत्वा त्र्यक्षर – अनेकदेवताकत्वसादृस्यमादाय ऐन्द्राग्नविकारत्वमेव।

एवं "सोमारौद्रं चरुं निर्वपेत् श्यामाकं सोमवामिनः" इति वाक्यविहिते यागे त्र्यक्षरवत्व – द्विदैवत्यत्वसादृश्यम् आदाय ऐन्द्राग्नविकारत्वं सम्भावितम्। किन्तु अक्षरसंख्यायाः शब्दप्रतिपाद्य अर्थविशेषणत्वेन बहिरङ्गत्वात् तदपेक्षया अर्थस्य अन्तरङ्गत्वात् सोमरूपार्थप्रतिपादकत्वेन अग्नीषोमीयविकारत्वमेव न ऐन्द्राग्नविकृतित्वम्। एवं "सोमापौष्णं चरुं निर्वपेत्" "सोमारौद्रं चरुं निर्वपेत्" इत्यादौ अपि सोमसमवायात् अग्नीषोमीयविकृतित्वम्।

शुनासीरीये "ऐन्द्रावैष्णवम्" इत्यत्र तु पञ्चाक्षरसादृश्यवत्वे अपि पूर्वोक्तयुक्त्या अक्षरसादृश्यस्य अर्थविषेषणत्वेन दौर्बल्यात् तदपेक्षया प्रबलभूत – अर्थसादृश्यमादाय इन्द्रदेवतासमवायात् ऐन्द्राग्नविकृतित्वम्। एवं "वैश्वदेवं निर्वपेत् भ्रातृव्यवान्" इत्यादौ चतुरक्षरवत्वात् नियामकाभावेन विकल्पः एव अङ्गीक्रियते। तेन ऐन्द्राग्नाग्नीषोमीय – अन्यतरविकृतित्वमेव अत्र।

पूर्वोकतः विषयः आपस्तम्भसूत्रे अस्ति "एकदेवता आग्नेयविकारा द्विदेवता अग्नीषोमीयवकारा बहुदेवताश्चैन्द्राग्नविकारा चेति"। कपर्दी तु यासां विकृतीनां द्विबहुदेवतापदेषु चत्वारि अक्षराणि अधिकानि वा ता अग्नीषोमीयविकाराः। यासां तु त्रीण्यूनानि वा ताः ऐन्द्राग्नविकाराः। अन्यत्र प्रकृतिदेवताभ्यः। अत्र च पूर्वोक्तनियमस्य इदं गमकं स्यात् यत् द्व्यक्षरस्य सामीप्यादेव त्र्यक्षरस्य प्रकृतियागस्य उपस्थितिः। षडक्षरादीनां सामीप्यात् पञ्चाक्षरस्य प्रकृतियागस्य उपस्थितिः इति। किन्तु अत्र चतुरक्षरस्य उभयसामीप्ये सति किं नियामकम् आदाय अग्नीषोमीयविकृतित्वम् उच्यते इति न ज्ञायते तदिदं ग्रन्थकर्ता अनुवदति एवम्, **"तत्र द्व्यक्षरेण सामीप्यात् अक्षरोपस्थितावपि षडक्षरादिभिश्च सामीप्यात्पञ्चाक्षरोपस्थितावपि चतुरक्षरे उभयसाम्यात् कथं पञ्चाक्षरस्यैवोपस्थितिरिति चिन्त्यम्"** इति।

पशुपुरोडाशे व्यवस्था धूर्तस्वामिमतखण्डनञ्च

पशुपुरोडाशयागे कथं प्रकृतिविकृतिभावः भवति इति ग्रन्थकारैः उच्यते, तत्र मूलपङ्क्तिः, **"यस्य तु कर्मणः क्वचिदुत्पत्तिचोदनया केन चित् प्रकृतिलिङ्गेन किञ्चिद्विकृतित्वम् अवधारितं तस्य कर्मणः अन्यत्र अतिदिष्टस्य ऊहेन अन्यदेवतात्वे अपि न तद्धेतुकं कर्मान्तरविकृतित्वं भवति पूर्वावधारितकर्मविकृतित्वं वा अपैति। अवधारिताङ्गविशिष्टस्यैव अतिदेशात्।** इति।

एवं पशुपुरोडाशयागानां प्रकृतिविकृतिभावे कश्चनविशेषः अस्ति। पशुयागानां प्रकृतिभूते अग्नीषोमीयपशुयागे तदङ्गतया पशुपुरोडाशयागः विहितः। तस्य च पशुपुरोडाशयागस्य "अग्नीषोमीयस्य वपया प्रचर्य अग्नीषोमीयं पशुपुरोडाशम् अनुनिर्वपति" इति वाक्येन अग्नीषोमीयदेवताकत्वावगमात् दर्शपूर्णमासीय अग्नीषोमीय – यागविकृतित्वम् देवतासादृश्यमादाय अवगम्यते। एवं स्थिते आग्नेयः यः सवनीयपशुयागः तदङ्गभूतस्य पुरोडाशयागस्य "यद्देवत्यः पशुः तद्देवत्यः पशुपुरोडाशयागः" इति नियमेन अग्निदेवताकत्वं स्थितम्। तदत्र अग्निदेवताकस्य सवनीयपशुयागाङ्ग – पुरोडाशयागस्य प्रकृतिभूतः यागः किं देवतासादृश्यमादाय दर्शपूर्णमासीयः आग्नेयः पशुयागः वा उत अग्नेषोमीयपशुयागः वा इति सन्देहे, पुशुयागाङ्गत्वेन अग्नीषोमीयपशुयागपृष्ठभावेन अतिदिष्टः पशुपुरोडाशयागः न्यायेन अन्यदेवताकः अपि आतिदेशिक – अग्नीषोमीयपहुयागाङ्ग – पशुपुरोडाशयागधर्माणां त्यागे प्रमाणाभावात् अग्नीषोमीय – अनुमन्त्रणादीन् एव प्राप्नोति न आग्नेयान् धर्मान्। अतः एव धूर्तस्वामिभिः यदुक्तम् आग्नेयपशुपुरोडयागस्य आग्नेयायागविकृतित्वं निरूढे च ऐन्द्राग्नपशुपुरोडाशयागे ऐन्द्राग्नविकृतित्वम् इति तत् उपेक्षणीयम्।

पार्वणहोमविचारः

[3]फलनियमकर्तृसमुदायानां अतिदेशः नास्तीति विशेषातिदेशस्य अपवादः यथा अष्टमे कृतः तथैव "[4]पार्वनहोमयोस्त्वप्रवृत्तिः" इति पार्वणहोमस्य अतिदेशापवादः अपि अष्टमाध्याये निरूपणीयः अपि

प्रसङ्गसङ्गत्या नवमाध्याये निरूपितः। प्रमेयस्य आष्टमिकत्वात् बालप्रकाशकारैः अष्टमाध्याये एव अयं विषयः निरूप्यते।

पार्वणहोमाधिकरणस्वरूपम्

- विषयवाक्यम् "स्रुवेण पार्वणौ होमौ जुहोति" इति।
- संशयः विधीयमाणकर्मद्वयं सौर्यादौ अतिदिश्यते उत न इति।
- पूर्वपक्षः अतिदिश्यते।
- सिद्धान्तः न अतिदिश्यते इति

दर्शपूर्णमासप्रकरणे "स्रुवेण पार्वणौ होमौ जुहोति" इति वाक्येन पार्वणसंज्ञके द्वे पर्वदेवताककर्मणी विधीयेते। पर्वशब्दस्य लोकप्रसिद्धार्थः पौर्णमास्यमावास्याकालः।

**काले शब्दस्य मुख्यत्वात् कालाभीजेह मन्यते।**
**पृणातेर्दानकर्मत्वात् कर्मण्यपि च मुख्यता॥**

पृणातेः दानकर्मणः निष्पन्नः पर्वशब्दः। सः च करणव्युत्पत्या यथा काले मुख्यः तथा भावव्युत्पत्त्या कर्मणि अपि मुख्यः। प्रकृते च पर्वशब्दस्य करणव्युत्पत्त्या कालार्थकत्वं स्वीक्रियते चेत् अदृष्टार्थत्वापत्तिः। कर्मार्थत्वं स्वीक्रियते चेत् कर्मणः उपयोक्ष्यमाणत्वात् तत्संस्कारकत्वम् इति दृष्टार्थत्वलाभः। अतः पर्वशब्दस्य दर्शपूर्णमासकर्मपरत्वम्। अत्र च भावव्युत्पत्त्या कर्मपरत्वस्वीकारे विद्वद्वाक्यादिः तात्पर्यग्राहकः भवितुमर्हति। प्रकृतकर्मणां च एकपर्वशब्देन प्रतिपादनात् व्यासक्तं देवतात्वं न प्रत्येकम्। समुदायस्य च देवतात्वात् एतादृश समुदायस्य च विकृतौ अभावात् न सौर्यादौ अतिदेशः इति सिद्धान्तः।

<u>अधिका शङ्का</u>

बालप्रकाशकारैः अत्र <u>पूर्वपक्षान्तरोत्थितिः</u> प्रदर्श्यते, तथा हि पर्वशब्दस्य समुदायवाचित्वं वा यागवाचित्वं वा इति निर्णयः अपेक्षितः। पौर्णमास्यधिकरणे हि दर्शशब्दस्य पूर्णमासशब्दस्य च समुदायवाचित्वं नास्ति यागवाचित्वमेव इति निर्धारितम्। तद्वदेव अत्रापि पर्वशब्दस्य यागवाचित्वमेव न तु समुदायवाचित्वम्। एवं पार्वणहोमजन्यस्य संस्कारस्य आग्नेयादि प्रत्येक – यागवृत्तित्वावगमात् च आग्नेयसम्बन्धित्वेन रूपेण यत्र धर्मातिदेशः सौर्यादौ, तत्र पार्वणहोमस्यापि अतिदेशः भवेदेव। इति पूर्वपक्षः।

समाधानम् उच्यते महेन्द्राधिकरणे विधिमात्र – प्रमेया देवता इत्युक्तम्। तेन "स्रुवेण पार्वणौ होमौ जुहोति" इत्यत्रापि पर्वशब्दस्य तद्धितेन देवाप्राप्तिः भवता अपि वक्तव्या। तेन देवतायाः उपादेयगतत्वात् तद्गतसाहित्यं विवक्षितम्। पुनः अस्यैव पार्वणशब्दस्य संस्कार्यत्वसमर्पणे वैरूप्यलक्षणः वाक्यभेदः भवेत्। पर्वदेवताकस्य च कर्मणः पर्वस्मारणसामर्थ्यम् अस्ति इति सामर्थ्यरूपात् लिङ्गात् अस्य वाक्यान्तरकल्पनया दर्शपूर्णमासकर्मणि एव विन्बियोगः। तथा च येन रूपेण विधेयत्वं तेनैव रूपेण संस्कार्यत्वम् इति विधेयसामर्थ्यानुरोधेन विधिवाक्यजन्यबोधे परस्परसहितानामेव देवतात्वेन अन्वयः अवगतः इति कृत्वा कल्पितवाक्ये उद्देश्यतया अपि परस्परसहितानामेव संस्कार्यत्वं स्वीकर्तव्यम्। अतः प्रत्येकं देवतात्वं नास्तीति कृत्वा न प्रत्येकविकृतौ सौर्यादौ न अतिदेशः।

ननु "स्वर्गकामो यजेत" इत्यत्र आख्यातोपात्तम् एकत्वम् उपादेयत्वात् विवक्षितमपि स्वर्गकामः इत्यत्र उद्देशविशेषणत्वात् अविवक्षितम् इति एकस्यैव सङ्ख्यापदार्थस्य विधेयांशे विवक्षा उद्देशांशे अविवक्षा इति यथा भवति , तद्वदेव प्रकृते अपि पर्वदेवतायाः उपादेयगतायाः विवक्षा अनुपादेयगतायाः अविवक्षा इति कुतः नाङ्गीक्रियते? इति तदुपरि शङ्का।

समाधानम् उच्यते "स्वर्गकामः" इत्यत्र श्रूयमाणवाक्ये उद्देश्यं, तद्गतम् एकत्वं च समर्पणीयम्। प्रकृते तु पर्वदेवतायाः संस्कार्यत्वं कल्पितवाक्येन बोध्यते। तत्र च वाक्यभेददोषः न भवति। तदुक्तम्,

**"श्रूयमाणस्य वाक्यस्य न्यूनाधिकविकल्पने।**
**लक्षणावाक्यभेदादि दोषो नानुमिते ह्यसौ"॥**

ननु तथापि प्रत्यकविकृतौ सौर्यादौ अतिदेशः मास्तु नाम तथापि समुदायविकृतौ अतिदिश्यते एव। यथा वैश्वदेवेषु तत्र सर्वे यागाः समप्रधानाः सहिताः एकप्रयोगतया विधीयन्ते। इति सहितानां संस्कारकत्वम् उपपद्यते एव। यथा पशुपुरोडाशयागे "वपया प्रचर्य अग्नीषोमीयं पशुपुरोडाशम् अनुनिर्वपति" इति वाक्यविहिते स्वोत्पत्तिवाक्ये श्रूयमाणदेवतासाहित्यस्य उपादेयगतत्वेन विवक्षाया-मपि साध्याकाङ्क्षायां कल्पितवाक्ये विवक्षितसाहित्ययोः पुशुयागी-याग्नीषोमीययोः संस्कारकत्वं कल्प्यते तत्र च न वाक्यभेदः। एवं अन्यस्मिन् पशुयागे अतिदिष्टे अपि तत्र पशुयागस्य अनेकदेवताकत्वे अपि सहितसंस्कारकत्वं युक्तमेव।

<u>पार्वणवैमृधयोः न्यायवैषम्यम्</u>

"संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपति" इत्यत्र तु श्रूयमानवाक्ये "पौर्णमासीं" इति द्वितीयान्तस्यापि पदस्य सक्तुन्यायेन

करणत्वलक्षणया पौर्णमास्युत्तरकालविशिष्ट – वैमृधविधाने पश्चात् भाव्याकाङ्क्षायां उद्देश्यवाचक – पदकल्पनायां पौर्णमासीपदमेव कल्प्यते उपस्थितत्वात्। पौर्णमासीपदमपि आग्नेयादि – प्रत्येकं यागमेव वदति इति पौर्णमास्यधिकरणे उक्तम्। तथा च कल्पित – वाक्ये आग्नेयादीनां साहित्यविवक्षाभावात् प्रत्येकमेव पौर्णमासी-पदोपस्थितानां यागानाम् उद्देश्यत्वम्। तथा च प्रत्येकविकृतौ वैमृधातिदेशः सिद्धः भवति।

**तस्माद्याज्ञिकवर्याणां पार्वणन्यायतो कृतिः ।**

**विकृतौ वैमृधस्येति न्यायज्ञैर्नादृतं वचः॥**

पार्वणहोमाधिकरणे खण्डदेवरीतिः

खण्डदेवकृत – भाट्टदीपिकायां अयमेव सिद्धान्तः प्रकारान्तरेण आनीयते। तथा हि पार्वणहोमाधिकरणे पञ्च पूर्वपक्षाः

यथा

1. पार्वणशब्दस्य कालपरतया तस्य च संस्कार्यत्वाभावात् आरादुपकारकत्वेन प्रयाजादिवत् अतिदेशः इति प्रथमः पूर्वपक्षः। (कालपरत्वम् आरादुपकारकत्वम्)
2. कालपरत्वे अपि कर्माङ्गतया सङ्कल्पे कालस्य उपयोगात् तत्स्मरणस्य च पार्वणहोमकर्मणा कर्तुं शक्यत्वात् स्मृतेः च अनुष्ठीयमान – कर्मणः अकालिकत्वभ्रमजन्य – अश्रद्धा परिहारे उपयोगात् सन्निपत्योपकारकतया पशुपुरोडाशयागवत् अतिदेशः इति द्वितीयः पूर्वपक्षः। (कालपरत्वम् सन्निपत्यो पकारकत्वम्)
3. पृणातेः दानवाचित्वात् भावव्युत्पत्त्या कर्मपरत्वेपि वा प्रयाजपृष्ठभावेन यथा तदीयदेवतानाम् सौर्ये अतिदेशः तथैव आग्नेयादीनामपि पार्वणहोमदेवताभूतानां सौर्ये अतिदेशः अस्त्येव इति तृतीयः पूर्वपक्षः। (कर्मपरत्वम् आरादुपकारकत्वम्)
4. तुरीये पूर्वपक्षे सन्निपत्योपकारलाभाय सन्निपत्योपकारकत्वम् अङ्गीकृत्य देवतासाहित्यस्य विवक्षा अस्ति न वा इति विचारः कृतः।

इत्येवं चतुर्विधं पूर्वपक्षं कृत्वा अन्ते विधिवाक्यगतस्य पार्वणशब्दस्य न देवतासमर्पकत्वम् अपि तु पार्वणहोमे मान्त्रवणिक – देवतात्वमेव इति उक्तम्।

5. तथा हि पार्वणहोमे "ऋषभं वाजिनं वयं पूर्णमासं यजामहे अमावास्या सुभगा सुशेवा[5]" इति मन्त्रगत – पूर्णमास्यमावास्या एव देवता। अतः एव च उद्देशत्यागे "पूर्णमासाय इदन्न मम" इति प्रयोगः।अतः कालवाचकत्वपूर्वपक्षः सुतरां पराजितः। अत्रैव वैमृधन्यायेन सह अस्यवैलक्षण्यं बालप्रकाशकारोक्तरीत्या एव स्पष्टीकृत्य उपरि कोटिः उक्ता। देवतासाहित्यविवक्षायाम् अविवक्षायां वा पार्वणहोमस्य सिद्धान्तिना अपि आश्रयिकर्मत्वाङ्गीकारात् परप्रयुक्तदेवतोपजीविनः अस्य विकृतौ अतिदेशे न किञ्चित् बाधकम् इति पूर्वपक्षः।

सिद्धान्तः तु ,

सत्यं तथापि याज्ञिकाचारे कुत्रापि पार्वणहोमस्य अनुष्ठानाभावत् याज्ञिकाचारः एव प्रकृतौ साहित्यम् आग्नेयत्वादिकं च उद्देश्यतावच्छेदककोटौ विवक्षितं भवति इत्यत्र गमकम्। एतादृशस्य उद्देश्यस्य च सौर्यादिविकृतौ अभावात् न पार्वणहोमयोः अतिदेशः। उद्देश्यतावच्छेदककोटौ आग्नेयत्वादिनां विवक्षया एव तत्तद्विकृतौ पार्वनपर्युदासार्थं अनन्तश्रुतिकल्पना न क्रियते।सूत्राणि अपि आचारमेव उररीकृत्य समुदायार्थतारूप हेतुपरतया व्याख्येयानि इति सिद्धान्तः।

**References**


1. Bhattadipika by Satguru Publications
2. Mimamsa by Chowkhamba Publications 1959
3. Krishna Yajurveda Granthalipi by Heritage India Educational Trust 15th edition (2005)


**Abbreviations**

पू.मी = पुर्वमीमांसा followed by numbers, Adhyaya - Pāda - Adhikaraṇam

Example 1-1-1 resembles 1st Adhyaya 1st Pāda 1st Adhikaraṇam.

कृ.य.वे.तै.सं = कृष्णयजुर्वेद-तैत्तिरीय-संहिता followed by numbers kāṇḍa-praśna-anuvāka

Example 1-1-1 resembles 1st kāṇḍa-1st praśna-1st anuvāka.

कृ.य.वे.तै.ब्रा - कृष्णयजुर्वेद-तैत्तिरीय-ब्राह्मण followed by numbers aṣṭaka-praśna-anuvāka

Example 1-1-1 resembles 1st aṣṭaka-1st praśna-1st anuvāka.

**Footnote**

[1] तै.सं 2-5-2

[2] कृ. य. वे. तै.सं 5-5-1

[3] पू.मी.8-1-4

[4] पू.मी.9-2-17

[5] कृ.य.वे.तै.ब्रा 3-7-5